# नमोऽस्तु ते व्यासविशालबुद्धे

**डॉ. योगेश-त्रिवेदी**
**बरोडा-संस्कृतमहाविद्यालयः**
**म.स.विश्वविद्यालयः, वटोदरम्**

महाभारतं हि नाम भूम्ना अनुष्टुब्बहुलछन्दोपबद्धं महर्षि-कृष्णद्वैपायनैः प्रणीतं कौरव-पाण्डवयोः युद्धवर्णनपरम् अनेकाख्यानोपाख्यानगाथादिभिः सुगुम्फितं धर्माऽर्थकाममीक्षाणां विशदविवरणात्मकं परमरणीयं महाकाव्यम् । विश्वज्ञानकोशस्य महाराशिः वरीवर्तते । प्रसिद्धा चेयं भणितिः -

**'यदिहास्ति तत्सर्वत्र यन्नेहास्ति न तत्कचित्'।**

एतादृशमहाकाव्यस्य स्रष्टा ततोऽपि महान् **'स भूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशाङ्गुलम्'** संसारे सर्जनाऽपेक्षया सर्जकः सदैव श्रेष्ठो भवति दशाङ्गुलम् ।

व्याख्यानमेतद् परिषदः समेषां अभिनवज्ञानमूलकविचारणां आश्रयरूपग्रन्थकर्तुः मानसचित्रं प्रस्तौष्यति । उर्ध्वबाहुव्यासस्य तच्चित्रं अस्मान् आह्वयति भो आगच्छन्तु, चलन्तु पश्यन्तु इति । मन्यामहे व्यासस्य विशालबुद्धेः समवलोकनेन आदर्शसाम्प्रतसमाजेभ्यः विचारविषयाणां प्रारूपं पूणी- भविष्यति । श्रीमद्भगवद्गीतायाः ध्यानमन्त्रेषु श्लोको वर्तते........

**'नमोऽस्तु ते व्यासविशालबुद्धे'**
**फुल्लारविन्दायतपत्रनेत्रम् ।**
**येन त्वया भारततैलपूर्णः**
**प्रज्वालितो ज्ञानमयप्रदीपः'।।**

अत्र व्यासेन भारतस्वरूपतैलेन परिपूर्णो बुद्धिजः ज्ञानविकारजन्यप्रदीपः प्रज्वालितः । ज्ञानस्य स्वरूपं कीदृशम् इति जिज्ञासायां बहुभिः प्रकारैः पाराशरपुत्रेण प्रतिपादितम् ।

**'ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्यके स्फुलिङ्गके ।**

---

१. (भागवतम् -११-१६-१४)
२. (भीष्मपर्व -२६/११ )

**अक्रुरे क्रुरके चैव समदृक् पण्डितो मतः' ।।**[१]

**गतासून-गतासूंश्च नानुशोचन्ति पण्डिताः ।।**[२]

अपरश्च-

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।**
**शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः।।**

अत्र समत्वबुद्धिरेव ज्ञानम् । तथैव-सर्वजनप्रियत्वं ज्ञानस्य लक्षणम् --

**यस्मान् नो द्विजते लोको लोकान्नो द्विजते चयः**
**तथैव-हर्ष-अमर्ष-भय-उद्वेगादीनामभावः ज्ञानम् ।**

उक्तञ्च श्रीमद्भगवद्गीतायाम् -

**'हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः '।।**[१]

ज्ञानस्य संकलितस्वरूपविषये केनापि सुष्ठुलक्षणं प्रत्यपादि ।

**'अक्रोधवैराग्य जितेन्द्रियत्वं**
**क्षमां-दया शान्तिजनप्रियत्वम् ।**
**निर्लोभदाता भयशोकहारी**
**ज्ञानस्य चिह्नं दशलक्षणानि'।।**

अनया रीत्या अक्रोधः वैराग्यम् जितेन्द्रियत्वम् (-**जहि शत्रुं महाबाहु कामरूपं दुरासदम्** (३/४३ )सर्वजनप्रियत्वम् (अत्र **'यस्मान्नो द्विजते लोको लोकान्नो द्विजते चयः'** इति व्यासोक्तिः सङ्गच्छति स्वसत्त्वनिवृत्तिपुरस्सरं दातृत्वभावत्वं तथा भय-शोकादीनामभावः एतानि दशलक्षणानि ज्ञानस्य चिह्नरूपेण प्रतिपादितानि।

मन्यामहे यद् तत्रभवान् महर्षिवेदव्यासेन जयसंहितायां ज्ञानस्य दशलक्षणानि कौरव-पाण्डवयोः

विविधाख्यानं द्वारीकृत्य प्रत्यपादि । यथा-

**युधिष्ठिरो धर्ममयो महाद्रुमः**
**स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा ।।**

इत्यादि ज्ञानाऽभावदशायां यथा-

**दुर्योधनो मन्युमयो महाद्रुम स्कन्ध कर्णः शकुनिः तस्य शाखा ।।**

ज्ञानलक्षणस्य सम्यग् अवलोकनेन ज्ञायते धर्म एव मूलम् । तद् अभावे च स्वजीवने समाजे च कीदृशी अनर्थकता समुद्भवति इत्यपि समाजेभ्यः विचारविषयस्य प्रारूपं पूरयति । धर्म एव अस्माकं जीवनस्य लक्ष्यबिन्दुः वर्तते ।

विश्वेस्मिन् विश्वे प्रायः समेषां मनुजानां स्थितिः दुर्योधनवद्वर्तते **'जानामि धर्मं न च मे** प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः'। रामायणं कामस्य परिणामेन जातम् । किन्तु महाभारतं क्रामक्रोधयोः फलश्रूत्या जातम् । दुर्योधने उभयतत्वानां वैपुल्यमासीत् । वस्तुतः पापपुण्ययोः व्याख्याने-

**'अष्टादशपुराणे व्यासस्य वचनद्वयम् ।**
**परोपकारपुण्याय पोपाय परपीडनम् '।।**

अत्र सारस्तु-आत्मनः प्रतिकूलानि परेषां न समाचरेत् । किन्तु दुर्योधनेन तथैव कृतं फलं तु वयं सर्वे जानीमः। ।।२।।

मनुजानां जीवने धर्माऽधर्मयोः योग्याऽयोग्ययोः संघर्ष अनादिः वर्तते । दुर्योजनोऽपि वदति यत् जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः । श्रीमद्भगवद्गीतायामपि अर्जुनः कृष्णं शाश्वतप्रश्नं पृच्छति-

**'अथ केन प्रयुक्तोऽयं पापं चरति पुरुषः।**
**अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः' ।।**

प्रायः सर्वेषाम् अधर्मे साहजिकी गति र्भवति । धर्मपथि एव खलु यत्नः कर्तव्यः मानवैः ।

विश्वेस्मिन् विश्वे जनाः अर्थेन कामेन वा धर्मप्राप्तिं चिकीर्षन्ति। किन्तु कदापि एतद् भवितुं नार्हति । कौरवपक्षेण अर्थेन कामेन वा धर्मस्य प्राप्तिः चिन्तिता , यतो हि कामात् क्रोधोऽपि जायते- द्वितीयपक्षे युधिष्ठिरेण धर्मेणैव अर्थकामौ साधितौ। पक्षद्वयोः कीदृशी स्थितिः इति तु वयं जानीमः । एतां महाभारतोत्पादनमूलिकां समस्यां मनसिकृत्य एव परमकारुणिको भगवान् बादरायणो भणति-

**'उर्ध्वबाहुर्विरौम्येषु न कश्चिद् श्रृणोति माम् ।**
**धर्मेणैव अर्थकामौ स धर्मः कथं न सव्यते '।।**

साम्प्रतसमाजे महर्षिव्यासस्य एते सार्वकालिकसिद्धान्ताः अस्मान् बोधयन्ति यत् समेषां जागतिकक्रियाणां मूलं धर्म एव वर्तते । धर्मम् एव द्वारीकृत्य इतरेषां वर्गाणाम् अवाप्ति र्भवति । नान्यः पन्थाः विधतेऽयनाय ।।